Oriental Thought Series No. 8

General Editor : Dr. G. V. **Devasthali,** M. A., B. T., Ph. D.

आनन्दविलासः

A Vedānta Prakaraṇa Treatise

Edited for the first time with introduction etc.

by

Dr. C. T. **Kenghe,** M. A., Ph. D., Vedāntālaṅkāra

Price : Rs. 1–50

आनन्दविलासः

Acknowledgement

(The Editor desires to express his indebtedness to Dr. R. N. Dandekar, Dr. P. K. Gode and Shri S. N. Savadi of the B. O. R. I. for having supplied the Ms and allowed to publish it in the 'Oriental Thought Series' and also to Dr. A. D. Pusalker for his valuable suggestions.)

INTRODUCTION

The present edition of the Ānandavilāsa, a Vedāntic treatise, is based on the only* available manuscript of the work, from the Government collection of manuscripts deposited with the B. O. R. I. The manuscript is complete and mostly correct. The scribe has used Anusvāra uniformly for parasavarṇa and also at the end of a Pāda. Similarly he has dropped tugāgama and not used avagraha sign. These changes have not been noted. At all other places where corrections are made, original readings are noted in the footnotes. At times the letters are not very clear, but they can easily be made out from the context.

The Author :

At the end of the manuscript the author's name is given as Kamalākara Deva. His father's name is given as Devendra. He is said to have been born in the Deva family, the best in the Mahārāṣtra. It is also noted that he was given the title Vidyārāya by the King of Delhi. This king is said to be the sovereign amongst Soma sacrificers, one whose lotus-like feet were decorated with the head-garlands of all kings and who was very powerful. No further information about Kamalākara Deva is available. No work written by this Kamalākara Deva has seen the light of the day so far. Aufrecht has not given any information about Kamalākara Deva and has mentioned only Ānandavilāsa (our manuscript) as his work.

Further, the authorship of the Ānandavilāsa becomes doubtful; because, in the last verse of the work it is stated that the treatise has been written by Jaśavantasiṁha, a great king. Kamalākara Deva was a Mahārāṣṭrî Brahmin and he is said to have received a title of honour from the king of Delhi. Thus, Jaśavantasiṁha cannot be accepted as just another name of Kamalākara Deva. Aufrecht does not know any author named Jaśavantasiṁha. The name sounds Rājapūta or Puñjābî. Whether any such king ruled Rājputānā or Delhi sometimes before the seventeenth century is a matter worthy to be investigated by the historians. Whether this king was

* Aufrecht has noted only this manuscript. The editor will be grateful if the readers could supply any further information about other Mss of this work.

the patron of Kamalākara Deva and how he came to be associated with Kamalākara is a matter which must be left for further investigation in the present state of our knowledge. †

The Date :

Fortunately, our manuscript is dated and at least one end of the date of the Ānandavilāsa is quite certain. The scribe has given his name as Sukhānandaka Joshi, the son of Vāhālaji and has given Caitra Śuddha Pūrṇimā of the Saṁvat 1729 or Śāka 1594 as the date of copying the manuscript. It comes to 1672 A. D. Thus, our work is definitely not later than the seventeeth century.

From the internal evidence we can very well say that the work cannot be placed earlier than the fourteenth century. For, the author knows full development of Advaita Vedānta and Haṭha-yoga.

The Nature of Work :

The Ānandavilāsa contains in all one hundred and sixtynine (excluding the first which is unnumbered) verses mainly in Anuṣṭubh metre. However, the author has also used fourteen other metres. Verse 119 rather unusually contains three lines or six pādas in Upajāti metre. The table showing the number of verses in different metres has been given in the appendix. The verses are not arranged into sargas or chapters and form as a whole a Prakaraṇagrantha on Vedānta. As the author says at the end, all the important topics of the Advaita Vedānta system have been discussed in this work in a nutshell.

---

† I learn from Shri G. H. Khare that one Jaśavantasiṁha of Jodhpur, wellknown for patronising several poets, had come to Mahārāṣṭra in 1661 A. D. He stayed at Poona, from 1661 to 1664. It seems that he patronised Kamalākara Deva and hence the author has attributed the work to him. In that case, the King of Delhi who conferred the title Vidyaraṇya on our author might have been Shahajahan. For Aurangzeb could have seldom conferred any title on a Hindu Poet. The epithet 'Somayaji Sarvabhauma' will have to be construed with the author himself. Thus, the manuscript is contemporary of the author and can be accepted as quite authoritative.

(For the account of Jaśavantasiṁha, cf. Māravāḍakā Itihāsa by Pandit Vishveshwaranath Reu. pp. 210 to 245)

The Style :

The work is written in a very fine poetic style. Though the poet is fond of the Śabdālaṁkāras like Anuprāsa and Śabdaśleṣa, his Prasādaguṇa is also quite admirable. The author has not tried to bring in any Alaṁkāra at the cost of simplicity. The similes and metaphors used by the poet are quite appealing and appropriate. In the very first salutation verse we find several Śabdālaṁkāras and Arthālaṁkāras like Anuprāsa and Upamā.

माङ्गल्यकुम्भमिव कुम्भयुगं दधानं गौरीसुतं विविधविघ्नविघातहेतुम् ।
शुद्धैकदन्तमहसा त्रिनिवेदयन्तमद्वैतमात्मविषयं गणनाथमीडे ॥१॥

The Śliṣta Paramparita Rūpaka in the fourth verse is also quite striking and appropriate.

पाराशर्यवचोविलाससमसृणैः सूत्रैः क्रमेणाततैरव्यक्तैः प्रकटीचकार भगवान् यो भाष्यसंज्ञं पटम् ।

The description of Cupid as Aindrajālika in the 15th verse is similarly quite appealing.

ऐन्द्रजालिकवरोऽयमनङ्गो दर्शयत्यहह कार्यमहेतु ।
मांसशोणितमयीमपि मूर्तिं दर्शयत्यतिमनोहररूपाम् ॥

Such instances of poetic grace can easily be multiplied. However, these few instances are sufficient to give the readers an idea of the style of the work. Our author seems to be quite learned and erudite as well. He has quoted a few verses from the Mahābhārata, Manusmṛti and Yogavāsiṣtha and used correctly the philosophical terminology of Advaita Vedānta. Many verses are just a paraphrase of Śaṅkarācārya's verses from Saundaryalaharī and other Prakaraṇa works. At times, we come across irregular grammatical forms like वदस्व and शृणुष्व.

The Summary of Contents :

Salutation verses to Nṛsiṃha (not numbered), Gaṇeśa, Brahman (1–3), Śaṅkarācārya (4)

Śaṅkara was sitting on the bank of the Ganges discussing philosophical matters with sages, when a man disgusted with worldly sorrows approached him and saluted prostrating completely on the ground. Śaṅkarācārya asked him his name etc. and the purpose of the visit. The fellow replied that he

did not know his name, native place and caste, but knew from the peoples' speech that he happened to be Jîva. He continued his speech — 'Good people say that this world is false, that which appears here as happiness is also misery in reality just like good food mixed with poison. I find no solace from the family. The idea of myness itself is misery. Hearing the advice of Vyāsa I am convinced that one is not so much grieved when a sparrow or a rat is eaten up by a cat as when a housecock is eaten. Thus, the bondage is caused by egoism or myness and I am troubled by the worry as to who can release me from the same. While I was thinking like this, another cause of misery came to my mind. The desire etc. are the undefeatable enemies that are spreading in my mind. How to conquer them is the question. (4-14) Description of the six enemies (15–33). Description of the senses and subtle body. The senses are all deceptive. Thus being convinced that the world is full of sorrow, though it appears at times as happiness, I have given up all egoism and left the house. Thus, while wandering helplessly, I have found resort in you'. (34 to 50). Satisfied with this speech, the teacher approved it and said that Avidyā or Nescience is at the root of the world and that it can be destroyed only by knowledge. The disciple asks the question about the nature of knowledge. The teacher points out that knowledge can be acquired only through the proper means. The six means, desire for knowledge (Jijñāsā), Sense-control (Dama), etc. described. The teacher also says that the means are already present in the disciple and that he has also approached the proper teacher. (51–59). Hathayoga explained. Eight Aṅgas Yama etc. described. The five Yamas Ahiṁsā etc., Five Niyamas Śāma etc., Āsana, the six karmas Netī etc., the three Bandhas Jālandhara etc., Mudrās Khecari etc. casually explained. The threefold Prāṇāyāma, Dhāraṇā, Dhyāna (Śravaṇa, Manana, Nididhyāsana). (60–78). The disciple pleased at the teacher's speech asks the nature of the Self. The teacher explains that existence (Sat) itself is the nature of the Self and that everything else is false. The disciple asks how the result of Śravaṇa etc. can be real when Śravaṇa etc. are themselves false. The teacher explains that in the phenomenal state the Śravaṇa etc. are real. When they become unreal knowledge also disappears just as when the wood is completely burnt, the fire also gets extinguished. The disciple asks what the basis of the world-appearance can be, just as the mother of pearl is the basis of silver

appearance. The teacher replies that Brahman is the basis. The pupil asks if the world is just a form of Brahman, the Ultimate Reality, how can it be false. The teacher explains with the illustrations of an actor playing the role of Rāma and the rope appearing like a serpent. Though the actor and the rope are real, Rāma and serpent are false. Even without similarity there can be an error, just as blueness is superimposed upon ether or gur is considered bitter etc. (79–94).

The whole world consists of five elements viz., Asti (being), Bhāti (light), Priyam (love, bliss), Rūpa (form), Nāman (Name). Out of these. the first three form the Brahman and the remaining two are false. The illusion is created because of ignorance of the substratum. But why is the Brahman unknown ? The cause is Avidyā with her powers of concealing (Āvaraṇa) and fragmenting (Vikṣepa). Brahman appears as many individual soulsd ue to Avidyā or nescience. This Avidyā cannot be described either as real or as unreal. As Rāhu conceals the Moon while resorting to her alone similarly Avidyā resorts to Brahman and conceals it. Due to its association with Māyā Brahman becomes the Creator. He first creates Ātman or individual soul. From Ātman ether, from ether wind or air, from air fire, from fire water and from water earth - all in subtle form. The admixture of these elements results into creation of gross elements and then the whole universe is created. The substratum of all this illusion is undoubtedly Brahman. It remains real as long as Brahman is not realised. Now what is this knowledge or realization which destroys nescience? Well ! It is realization of identity of Jīva and Brahman. What is Jīva ? What is Brahman ? and how is their identity ? Jīva is that which is known by the experience of ' I '. The senses, mind etc. can be said to be ' mine ' and hence they are not the object of ' I ' experience. Jīva is just a knot of sentient and nonsentient, it is the reflection of the sentient Being in the internal sense. How is it associated with body ? The body is threefold viz., the cause, the subtle and the gross. The first is nescience, the second is called Liṅga and the gross is made up of the elements. The association of the cause and the subtle bodies results into transmigration. When these two are destroyed Jīva becomes one with Brahman. (95–115).

The Pañcāgnividyā explained (116–121) as also the threefold Karman-Kriyamāṇa, Prārabdha and Saṁcita. One can attain good results by

worshipping the highest Lord. The pupil asks why is the Lord partial? Why does He give good fruit only to those who worship Him? The teacher explains, it is just the nature. Fire can only remove cold of the person who approaches it. Again, when the Lord gives fruits according to Karman, there cannot be any partiality. The Karman being nonsentient cannot give fruits by itself But how the qualityless Brahman can give the fruits? Well! The reflection of Brahman in Māyā is called Īśvara. His definition is two-fold. Indirectly he can be defined as the cause of creation etc. But directly he is of the nature of Being, Knowledge, and Bliss. But how can the qualityless Brahman be called Being, Knowledge and Bliss? The reply is that these words denote only the removal of their apposites. When through the sentences like 'Thou art that' identity of Jīva and Brahman is realised that knowledge results into emancipation. But how can the different Jīva and Brahman become one? Just as man remains the same in different states like childhood, youth and old age, similarly the difference is just created by the states; but when the limiting adjuncts viz. Māyā and Manas disappear, Jīva and Brahman are one by nature. By this knowledge all Karmans are destroyed. He remains in the body till death like burnt rope. He is called Jīvanmukta. When this knowledge arises at the time of death, the state is called Sadyomukti. With this much explanation from the Guru, the Śiṣya attains Jīvanmukti and describes his condition of perfect Bliss. (122–159) The whole work is named Ānandavilāsa, because it propounds the means to attain 'Ānanda' or Bliss and describes its Vilāsa (enjoyment) after attainment.

आनन्दविलासः

श्रीरस्तु सर्वेभ्यः ।। श्रीनृसिंहपदद्वंद्वसंदानितमनोरथः । यापयामि सदा तावदनेहसमनीहया ।।

माङ्गल्यकुम्भमिव कुम्भयुगं दधानं गौरीसुतं विविधविघ्नविघातहेतुम् ।
शुद्धैकदन्तमहसा विनिवेदयन्तमद्वैतमात्मविषयं गणनाथमीडे ।।१।।
नानावर्णविचित्रं चित्रमिदं यन्निजेच्छया रचितम् ।
नाशयति विश्वमखिलं जगदाधारं प्रणौमि तद्ब्रह्म ।।२।।
निखिलं प्रपञ्चजातं प्रकटीभूतं निजेच्छया यस्य ।
वन्दे तदहमनादि जगदाधारं परं ब्रह्म ।।३।।
पाराशर्यवचोविलासमसृणैः सूत्रैः क्रमेणाततै
रव्यक्तैः प्रकटीचकार भगवान् यो भाष्यसंज्ञं पटम् ।
अज्ञानोद्भवजाड्यनाशकरणं स्वानन्ददं सेविनां
तं वन्देऽखिलयोगिवन्द्यचरणं श्रीशंकरं शंकरम् ।।४।।
एकदा सुरनदीतटवर्ती शंकरो यतिवरैः समुपेतः ।
स्वासने समुपविश्य चकार ब्रह्मबोधजननाय कथास्ताः ।।५।।
तं निरीक्ष्य समुपेत्य पुरस्तात्कश्चिदाकुलमना भवदुःखैः ।
श्रद्धया तु परया विवशः सन्दण्डवत्परिपतन् प्रणनाम ।।६।।
तं कृपाकुलमना यतिराह त्वं कुतोऽसि नु किमिच्छसि मत्तः ।
नाम धाम च तव प्रभवस्ते कां नु जातिमधिकृत्य वदस्व ।।७।।
तं प्रणम्य पुरुषः पुनरूचे नाम धाम च न मे विदितं स्वम् ।
जातिरप्यहह जीव इति स्वं लोकवाक्यरचनाभिरवैमि ।।८।।
मिथ्या भवोऽयमिति सत्पुरुषा वदन्ति दुःखं नु मे बहुतरं न सुखं कदापि ।
यद्भासते सुखतया तदपीह दुःखं हालाहलाक्तपरमान्नवदेव नाथ ।।९।।
कार्याय मे भवति नैव कुटुम्बमेतन्नाहं कुटुम्बरुचये ममतैव दुःखम् ।
द्वैपायनोष्ठपुटनिःसृतवाक्यजातमाकर्ण्य मे मनसि संप्रति निश्चयोऽयम् ।।१०।।
मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ्ममताशून्ये कलविङ्केऽथ मूषके ।।११।।

---

३. 'वन्देऽतमहमनादि' (The numbers refer to the verses)

एवं क्लिेष ममताजनितो हि बन्धस्तत्किं करोमि कमु वा शरणं व्रजामि ।
को वा मदीयविविधार्त्तिहरप्रभावो मां मोचयेदिति भृशं परिचिन्तयामि ॥१२॥
इति चिन्तयतो ममान्यदेव प्रसभं दुःखनिदानमाविरासीत् ।
हृदये प्रसरन्ति वैरिणोऽमी बत कामादय एव दुष्प्रधर्षाः ॥१३॥
कामक्रोधौ लोभमोहौ मदश्च पञ्चामी वै मत्सरश्चापि षष्ठः ।
दुःखाम्भोधौ मज्जयन्त्येव लोकं जेयास्तेऽमी दुष्प्रधर्षाः कथं वा ॥१४॥
ऐन्द्रजालिकवरोऽयमनङ्गो दर्शयत्यहह कार्यमहेतु ।
मांसशोणितमयीमपि मूर्ति दर्शयत्यतिमनोहररूपाम् ॥१५॥
रूपप्रदर्शनविधानबलेन नेत्रं रूपग्रहग्रहिलमेव वशीचकार ।
द्वारेण तेन तु मनो विवशं विधत्ते हन्तास्त्यनङ्गचरितं बहुर्दुनिरूप्यन् ॥१६॥
पर्वतगुहाश्रितानां निःसङ्गानां यतेन्द्रियाणां च ।
स्मृतिमात्रतोऽप्यवश्यं हरति मनः कामिनी कष्टम् ॥१७॥
आविर्भूते पिशाचे मनसि मनसिजे भासते नैव धर्मो
नाधर्मोऽपि प्रकामं शमदमविधयो मूलतोऽस्तं प्रयान्ति ।
दुष्टोऽयं दुःखहेतुर्निजपरिचरणे भोगभाजामपि स्याद्
दुःखायैवेति किं न श्रवणमुपगता व्यासवाक्यप्रणाली ॥१८॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१९॥
किं वा क्रोधस्य माहात्म्यं ब्रवीमि विवशो यतः ।
पूज्यानवध्यानपि यद्धन्तुमिच्छति दुर्मनाः ॥२०॥
घातयति क्रोधवशो मातृपितृभ्रातृबन्धुवर्गादीन् ।
किं तद्विस्मयकारकमात्मनमपि हन्तुमाशास्ते ॥२१॥
लोभस्य संप्रति गुणानिह कान् ब्रवीमि रुद्ध्वा सुमार्गमथ दर्शयते कुमार्गम् ।
एकः समस्तगुणसंचयनाशकर्त्ता द्वेष्टा गुरोरतिलघुत्वगुणस्य दाता ॥२२॥
लुब्धस्तु कोटिधनवानपि याचकः स्याद्याञ्चाऽतिदैन्यजननी जगति प्रसिद्धा ।
व्यासेन वेदविदुषा ननु संगृहीतं श्लोकत्रयं जगति हास्यकरं प्रसिद्धम् ॥२३॥
यत्पृथिव्यां व्रीहियवं सुवर्णं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥२४॥

---

१३. वैरयोऽमी; दुःप्रधर्षाः १४. दुःप्रधर्षाः १५. अहेतुं १८. योग.

तृणादपि लघुस्तूलस्तूलादपि तु याचकः ।
वायुना किं न नीतोऽसौ मामयं याचयेदिति ॥२५॥
जीर्यन्ते जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
धनाशा जीविताशा च जीर्यतोऽपि न जीर्यति ॥२६॥
आशंसन्ते देहभाजः किमत्र चित्रं चित्रं तत्तु देहावसाने ।
प्राप्ता लोकं पैतृकं कव्यलुब्धाः पुत्रादिभ्यो हव्यकव्येच्छवो यत् ॥२७॥
मोहेन मुग्धमनसो विपरीतबुद्धिभाजो भवन्ति पुरुषाः किमु तत्र चित्रम् ।
प्राणापहारविषयव्यवसायमूले हालाहलेऽप्यमृतशब्दमुदीरयन्ति ॥२८॥
मोहस्य रागसंज्ञस्य प्रभावोऽयमखण्डितः ।
कुपुत्रे दुःखदे नित्यं पुत्रस्नेहो न नश्यति ॥२९॥
विवेकविधुरस्यास्य न स्वास्थ्यमुपजायते ।
मदेनैन्द्रियकं ज्ञानं सर्वमेव विनश्यति ॥३०॥
मत्तः पुमान्न जानाति धर्माधर्मादिकां क्रियाम् ।
मनुष्यः पशुतां याति ज्ञानवानज्ञतां नरः ॥३१॥
पीता मदं विरचयत्यहहा न पीता वैकल्यमेव कुरुते व्यसनार्तिभाजाम् ।
सैषा सुरा सुरगणैरपि सेव्यमाना हन्तासुरा न विदधाति कुतो विरक्तिम् ॥३२॥
मत्सरस्य पिशाचस्य महिमा परमाद्भुतः ।
अनुरागः स्वदोषेषु द्रोहः परगुणेषु च ॥३३॥
षड्भिरेतैरहंबद्धः कारागारे निवेशितः ।
इन्द्रियाणि मदीयानि तेषां वच्मि गुणागुणान् ॥३४॥
निखिलकरणजातं भूततन्मात्रयुक्तं श्रुतिपरिचयशीला लिङ्गदेहं वदन्ति ।
पुरुष इति पराख्या तेन जाता ममेयं मम मतिरिति हेतोर्मामकीनास्त एते ॥३५॥
एतैरेव मदीयो व्यवहारः सर्व एवायम् ।
इत्येषां वशगोऽहं नैते वश्या ममाद्यापि ॥३६॥
शुक्तिं प्रदर्शयति रूप्यतया ममेदं चक्षुः प्रतारकमतो न कथं विभाति ।
श्रोत्रेण वा सुखकरं तु किलाद्ययावन्न श्रावितं कथमिवाहितकारि नो तत् ॥३७॥
प्रतारकत्वे सन्देहस्त्वग्घ्राणरसनासु कः ।
कर्मेन्द्रियाणां तु कथा कैव स्याद्धितकारिषु ॥ ३८ ॥
ज्ञानेन्द्रियेषु पञ्चस्वेकैकमेव हन्ति चैकैकम् ।
मारयति रूपगमकं पतङ्गमेकं तपस्विनं चक्षुः ॥ ३९ ॥

श्रवणेन्द्रियेण तावन्निहन्यते नादलोभितो हरिणः ।
घ्राणेन्द्रियेण लुब्धो रुद्धः पङ्केरुहे भ्रमरः ॥ ४० ॥
रसविषया सा रसना रशना स्पष्टैव मीनस्य ।
मत्तमतङ्गजवैरी स्पर्शो दृष्टोऽतिकष्टाय ॥ ४१ ॥
एकैकमप्यनर्थाय तेषां तत्पञ्चकं मयि ।
सुखाभासे प्रलोभ्यैवं मज्जयत्यसुखार्णवे ॥ ४२ ॥
आन्तराणि करणानि पुनर्मामिवमेव वशयन्त्यसुखाय ।
तैरहं पुनरतीव निबद्धो मग्न एव विषयेषु चिराय ॥ ४३ ॥
यत्संकल्पविकल्पकल्पनपरं जेयं मनस्तत्कथं
तच्चैवानुगतातिनिश्चयपरा मुष्णाति मां शेमुषी ।
साहंकारकथा वृथा मदपरं नास्त्येव जीवेषु त
न्नाहं यत्र परप्रपञ्चरचनावैदग्ध्यदीक्षागुरुः ॥ ४४ ॥
मनःपाटच्चरस्यायं विश्वास्यश्चित्तनामकः ।
यत्र संस्काररत्नानि निधीयन्ते विधानतः ॥ ४५ ॥
बाह्यमान्तरमपीन्द्रियसंघं दुःखहेतुमवधारयतो मे ।
आधराधिपतिमा च दरिद्रं तुल्यतैव सुखिदुःखिकथासु ॥ ४६ ॥
सुखाभासं दुःखरूपमालोच्य निखिलं भवम् ।
त्यक्त्वा गृहाभिमानादि निर्गतोऽस्मि गृहान्निजात् ॥ ४७ ॥
दिदृक्षुणा तीर्थसंघं भ्रमता सफलीकृतम् ।
निजं चक्षुर्भवत्यार्द्रपङ्केरुहविलोकनात् ॥ ४८ ॥
निरालम्बः स्वामिन्नशरणतया भूमिवलयं
भ्रमन्नेवं दैवादकरवमहं त्वां नु शरणम् ।
इदानीमन्तर्मे तव चरणपङ्केरुहपरं
मम त्राता नान्यो भवजलधिमग्नस्य सहसा ॥ ४९ ॥
भवद्दर्शनतो नाथ वाञ्छा सफलतां गता ।
दुःखाम्बुधौ निमग्नोऽहं त्रातव्योऽस्मि त्वया गुरो ॥ ५० ॥
इत्याकर्ण्य वचस्तदीयमतुलं तुष्टो गुरु. प्राह तं
धन्यां सत्पुरुषोचितामनुगतस्त्वं रीतिमन्यादृशीम् ।
त्वद्वाक्यश्रवणादभून्मनसि मे तोषस्ततो मे वचः
श्रुत्वा धारय ते दशापरिणतिर्भव्याय भव्यायते ॥ ५१ ॥

दुःखात्मको ऽयं भव इत्यवादि त्वया तथैवैतदवेहि नूनम् ।
अज्ञानदोषावृतमानसानां सुखात्मना दुःखमपीह भाति ॥ ५२ ॥
अपथ्यं मिष्टमश्नाति रोगी कष्टफलं यथा ।
सुखं वैषयिकं तद्वद्दुःखायैव हि केवलम् ॥ ५३ ॥
अविद्यापरिणामं त्वं संसारं विद्धि पुत्रक ।
तन्नाशकं ज्ञानमेव ज्ञानाज्ञानविरोधतः ॥ ५४ ॥
शिष्यः प्रणम्य प्रोवाच निशम्य तु गुरोर्गिरम् ।
ज्ञानस्वरूपं मे ब्रूहि येनाज्ञानं विनश्यति ॥ ५५ ॥
तं गुरुः प्रणतं प्राह साधु वश्य सुभाषितम् ।
ज्ञानं साधनतो लभ्यं तत्राहितमना भव ॥ ५६ ॥
साधनकथां विचित्रामवहितचेताः शृणुष्व वश्य त्वम् ।
षट्संख्या तेषु कृता प्राचां वाचां विलासेन ॥ ५७ ॥
जिज्ञासा प्रथमं दमो ऽथ गदितो बाह्येन्द्रियाणां जय
श्चित्ताद्यान्तरनिग्रहः शम इति प्रोक्तो मुमुक्षोदिता ।
मुक्तीच्छोपरमो निरस्तविषयेच्छत्वं तितिक्षा परा
द्वन्द्वानां सहनं त्वयीश्वरकृपासिद्धानि साध्यानि नो ॥ ५८ ॥
सद्गुरूपसरणं यदिहान्यसाधनं तदपि दैववशेन ।
सिद्धमेव यदिह त्वमुपागाः श्रद्धया तु परया भवितव्यम् ॥ ५९ ॥
तत्रादौ हठयोगं त्वं सावधानमनाः शृणु ।
चित्तस्योज्ज्वलता येन परा संजायते क्षणात् ॥६०॥
प्रणम्य प्राञ्जलिः प्राह शिष्यः प्रीतमना गुरुम् ।
हठयोगविधिं नाथ ब्रूहि कारुण्ययन्त्रितः ॥६१॥
यमो ऽथ नियमश्चान्यदासनं प्राणसंयमः ।
प्रत्याहारो धारणा च ध्यानं च सुसमाधिता ॥६२॥
अहिंसनमहिंसोक्ता मनोवाक्कायकर्मभिः ।
सत्यं परहितं वाक्यं न याथार्थ्येन कीर्त्तनम् ॥६३॥
अदत्तस्यानुपादानमस्तेयं परिकीर्त्तितम् ।
स्वदारेष्वेव संतोषो ब्रह्मचर्यमितीरितम् ॥६४॥
अपरिग्रहसंज्ञस्तु ममतात्यागतो यमः ।
एते यमा मया प्रोक्ता नियमांश्च शृणुष्व मे ॥६५॥

इन्द्रियाणां जयः शौचं संतोषश्चाप्यतृष्णता ।
तपः कृच्छ्रादिकं प्रोक्तं स्वाध्यायोऽभ्यसनं श्रुतेः ॥६६॥
ईश्वरप्रणिधानं तु विष्णुपादाम्बुजे रतिः ।
नियमाः पञ्च ते प्रोक्ता शृणु योगाङ्गमासनम् ॥६७॥
स्थिरं सुखमिति प्रोक्तं तत्पतञ्जलिनाऽऽसनम् ।
अत्र प्रसङ्गसङ्गत्या षट्कर्माण्यपि वच्मि ते ॥६८॥
नेती घ्राणस्य संशुद्धिर्धौती हृदयशोधिनी ।
बस्तिर्बस्तिविशुद्धिः स्यान्नौली कोष्ठस्य शोधिनी ॥६९॥
भस्त्रा प्राणस्य संशुध्द्यै त्राटकं दृष्टिशोधनम् ।
एतैरिन्द्रियसंशुद्धिं वदन्ति किल योगिनः ॥७०॥
जालन्धरं तथोड्याणं मूलबन्धं च योगिनः ।
महावेधं खेचरीं च विपरीतां च शाम्भवीम् ॥७१॥
महामुद्रां च जानीहि सिद्धवाक्यप्रपञ्चतः ।
एतैर्विशुद्धदेहस्त्वं प्राणायामपरो भव ॥७२॥
पूरकः कुम्भकश्चैव रेचकश्चेति स त्रिधा ।
पूरयेदुदरं वायुः पूरके प्राणसंयमे ॥७३॥
अन्तर्निरोधनं वायोः कुम्भकोऽयमुदीर्यते ।
बहिर्निःसारणं वायोः प्रोक्तं रेचकसंज्ञया ॥७४॥
प्रत्याहारस्तु मनसो विषयेभ्यो निवर्त्तनम् ।
ध्येयदेशे तु चित्तस्य बन्धनं धारणा मता ॥७५॥
ध्यानं तदेकतानत्वं समाधिं शृणु पुत्रक ।
निर्विकल्पकरूपेण ध्येयाभ्यासोऽस्य लक्षणम् ॥७६॥
एतैर्विशुद्धचित्तस्य श्रवणे मनने तथा ।
अधिकारो भवेत्तद्वन्निदिध्यासनसंज्ञके ॥७७॥
श्रुतितात्पर्यविधृतिः श्रवणं गुरुवाक्यतः ।
मननं युक्तिभिस्तावच्छ्रुतार्थस्यैव चिन्तनम् ॥७८॥
विषयान्तरसंचारमन्तरा तस्य चिन्तनम् ।
निदिध्यासनसंज्ञं तद्येन ज्ञानं परं भवेत् ॥७९॥
इत्याकर्ण्य वचः स्वदेशिकमुखादुद्भिन्नरोमोद्गमः
शिष्यः प्राह गुरोऽवबुद्धमधुना सर्वं त्वदुक्तं मया ।

श्रीमद्वक्त्रसरोजनिर्गतवचःपीयूषपातात्परं
तत्त्वज्ञानपदार्थबोधसुभगं स्वात्मानमीहेऽधुना ॥८०॥
शंकरो गुरुरनन्यमनस्कं ते विनेयमिदमाह सुबुद्धे ।
आत्मतत्त्वमवधेहि सदन्यत्सर्वमेव जगदस्ति मृषेति ॥८१॥
ज्ञानस्वरूपं श्रुत्वेति शिष्यः प्राह प्रभो कथम् ।
श्रवणादिफलं सत्यं तन्मिथ्यात्वे कथं भवेत् ॥८२॥
व्यवहारदशायां तु गुरुशिष्यादिसत्यता ।
तथैव श्रवणादीनां सत्यतेत्यवधारय ॥८३॥
सत्यत्वे श्रवणादीनां तत्फलस्यापि सत्यता ।
तन्मिथ्यात्वे फलस्यापि मिथ्यात्वमिति निश्चितम् ॥८४॥
दाह्याभावे दाहकस्याप्यभावः कृष्णवर्त्मनः ।
ज्ञानाग्निर्विश्वमखिलं दग्ध्वा शाम्यत्यसंशयम् ॥८५॥
ऊचे गुरुं प्रणतिनम्रशिरा विनेयो
नाथ त्वदीयकृपया गलितोऽस्ति खेदः ।
मिथ्या प्रपञ्चरचनेत्यपि निश्चयो मे
सन्देहभूमिमियतीं विनिवेदयामि ॥८६॥
अधिष्ठानं शुक्तिर्भ्रमविषयरूप्यस्य तु यथा
तथा विश्वभ्रान्तेर्व्रजति किमधिष्ठानपदवीम् ।
अधिष्ठानं हित्वा भ्रमसमुदयो नैव हि भवे
त्तथाऽऽत्मा किंरूपः किमधिकरणश्चेति वद मे ॥८७॥
सस्मितः प्राह स गुरुर्वश्य विश्वभ्रमस्य नु ।
अधिष्ठानं ब्रह्म विद्धि यथा रूप्यस्य शुक्तिका ॥८८॥
आत्मा तु व्यापको रूपं तस्य सर्वमिदं जगत् ।
श्रुत्वेति प्राह स गुरुं जगत्पूज्यपदाम्बुज ॥८९॥
मम सन्देहसन्दोहमुच्छेत्तुं कः क्षमोऽपरः ।
सत्यस्य ब्रह्मणो रूपं विश्वं मिथ्या कथं भवेत् ॥९०॥
भ्रमश्चेत्सदधिष्ठानो मिथ्यात्वं तस्य वा कथम् ।
इति पृष्टो गुरुः प्राह समाहितमनाः शृणु ॥९१॥
नष्टे तथ्येऽप्यधिष्ठाने यथा वै रामता मृषा ।
सत्या रज्जुरधिष्ठानं तत्र मिथ्यैव पन्नगः ॥९२॥

सादृश्यमन्तरा केन भ्रमः स्यादिति चेच्छृणु ।
सादृश्यमन्तराऽपि स्यादाकाशे नीलिमा यथा ॥९३॥
गुडस्तिक्तस्तथा शङ्खः पीत इत्येवमादिकम् ।
भ्रमस्य पश्य वैचित्र्यं संसृतावपि तत्तथा ॥९४॥
अस्ति भाति प्रियं नाम रूपं चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपमुत्तरं तु मृषेष्यते ॥९५॥
अधिष्ठानाज्ञानं भ्रमजनकमित्येव घटते
न हि ज्ञाता शुक्ती रजतविधया भानविषया ।
किमत्राधिष्ठानं भवति परमात्मा यदि गुरो
स चाज्ञातः किं स्यादिति वद ममानुग्रहधिया ॥९६॥
साधु यदुक्तं भवता भवतु तथा तन्न सन्देहः ।
साऽविद्या भ्रमहेतुर्विक्षेपावरणशक्तिमती ॥९७॥
विशेषांशं छादयति या साऽऽवरणरूपिणी ।
अन्यथा दर्शयेद्या तु विक्षेपाख्या तु सा मता ॥९८॥
ब्रह्मैव नानाविधजीवभावमविद्ययाप्नोति न चित्रमत्र ।
तस्यास्तु लक्ष्माकलयाऽसतीति सतीति निर्वक्तुमशक्यमेव ॥९९॥
अतस्त्वनिर्वाच्यपदे निवेशं कुर्वन्ति भाष्यादिविदस्तु सुज्ञाः ।
ब्रह्माश्रिता संवृणुते तदेव प्रकाशमाभाति तदीयसङ्गात् ॥१००॥
कलानिधेः सङ्गवशात्तु राहुः प्रकाशते छादयते तमेव ।
प्रकाशयत्येव तथा विसत्या ब्रह्माश्रिताऽज्ञानकथाऽपि तादृक् ॥१०१॥
मायासङ्गादीश्वरत्वं प्रपद्य ब्रह्माण्डीयां कर्तृतामेष याति ।
आत्मा तस्मादात्मनो व्योम चास्माद्वायुर्वायोरग्निरस्मात्तथाऽऽपः ॥१०२॥
अद्भ्यो भूः सूक्ष्मरूपाणामेषामन्योन्यमिश्रणात् ।
स्थूलोत्पत्तिस्ततः सर्वप्रपञ्च इति वेदगीः ॥१०३॥
अधिष्ठानं भ्रमस्यास्य ब्रह्मैवैवमसंशयम् ।
ब्रह्मापरोक्षविज्ञानपर्यन्तैवास्य सत्यता ॥१०४॥
कीदृशं तत्तु विज्ञानं येनाज्ञानविनाशनम् ।
तत्त्वमस्यादिवाक्येन जीवब्रह्मैक्यवेदनम् ॥१०५॥

---

१०० तमेव

अविद्यानाशकं ब्रूमस्तत्र जीवोऽब्रवीदिदम् ।
को जीवः कीदृशं ब्रह्म तयोरैक्यं च मे वद ॥१०६॥
गुरुः प्रोवाच तं शिष्यमहंप्रत्ययगोचरम् ।
जीवं जानीहि सुमते नेन्द्रियाणां तु सा विधा ॥१०७॥
मदीयं चक्षुरित्याद्यैः प्रत्ययैरवधारय ।
नाहं मनो मनो मेऽस्तीत्येवंप्रत्ययतो मनः ॥१०८॥
नाहंताविषयं चित्तं मदीयमिति बुद्धितः ।
न तद्विधा बुद्धिरपि तथावच्च तथा न च ॥१०९॥
मदीयत्वेन यद्भाति नाहंताविषयं हि तत् ।
देहस्थित्यस्थिती येन स प्राणोऽपि तथा न हि ॥११०॥
अहंकृतिर्ममेत्यादिबुध्द्या सोऽपि तथा न चेत् ।
तस्याप्याविद्यकत्वेन नाङ्गीकुर्मस्तथाविधाम् ॥१११॥
चिदचिद्ग्रन्थिरूपोऽयमहंप्रत्ययगोचरः ।
चितोऽन्तःकरणे यस्तु प्रतिबिम्बोऽत्र जीवधीः ॥११२॥
चैतन्यप्रतिबिम्बस्य देहसम्बन्धिता कथम् ।
शृणु त्वं देहसम्बन्धकथां श्रुत्वावधारय ॥११३॥
देहस्त्रिधाऽस्य किल कारणसूक्ष्मसंज्ञौ
स्थूलश्च तेषु हि भवेत्प्रथमस्त्वविद्या ।
सूक्ष्मस्तु लिङ्गमिति वेदविदां प्रवादः
स्थूलं तु भौतिकमिमं कुशलावधेहि ॥११४॥
संलग्नतैव किल कारणसूक्ष्मयोः स्या
ज्जीवेन संसरणमप्यत एव तस्य ।
ध्वंसे तयोः सपदि जीवपदाद्विमुक्तो
ब्रह्मात्मतां सपदि संप्रतिपद्यते सः ॥११५॥
कर्माधीनोत्पत्तिकः स्थूलदेह
स्तस्योत्पत्तौ वच्मि तावत्प्रकारम् ।
तोयं चैकं पञ्चमीमाहुतीं स्वां
संप्राप्यैवं पौरुषीं याति संज्ञाम् ॥११६॥

---

१०९ तद्विधं

संकल्पतो याऽऽहुतिरादिमा स्या
त्तथाऽपरा होमविधेस्तृतीया ।
दृष्टाऽऽहुतिर्भोजनकर्मणाऽन्या
शुक्राहुतिः सा पुरुषत्वहेतुः ॥११७॥

अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥११८॥

संकल्पतो याऽऽहुतिरादिमा स्यात्
तथाऽऽहुतिः स्यादपराऽग्निहोत्रे ।
सा भानुपर्यन्तमुपैति मन्त्रमाहात्म्यतोऽस्मादथ वृष्टिरूपा
तथा चतुर्थी पुरुषान्नभुक्तिः स्यात्पञ्चमी मैथुन एव शौक्री ॥११९॥

शुक्रं गर्भाशयं प्राप्य पुरुषत्वं प्रपद्यते ।
एवं स्थूलस्य देहस्य तूत्पत्तिरिति वेदवाक् ॥१२०॥

मुख्यं तु कारणं कर्म स्थूलदेहस्य कारणम् ।
कर्मानुरूपो देहः स्यात्सुखं दुःखं च कर्मतः ॥१२१॥
कर्म त्रिधा क्रियमाणं प्रारब्धं संचितं तथा ।
प्राग्भवीयं हि यत्कर्म संचितं तु तदुच्यते ॥१२२॥
प्रारम्भकं यद्वपुषोऽस्य कर्म प्रारब्धमेतन्निगदन्ति सन्तः ।
महेश्वराराधनतः शुभाऽस्य गतिर्भवेदेतदतिप्रसिद्धम् ॥१२३॥
भवद्वचनमाधुरीमहिमतोऽस्मि निःसंशयः
परन्तु भगवन्निदं परमसंशयस्यास्पदम् ।
शुभानि बत सेवितो वितरति स्म नैवान्यथा
महेशितुरियं कथं विषमता जरीजृम्भते ॥१२४॥
भद्र भद्रमधुना त्वमवादीर्द्वेषरागघटना कथमीशे ।
किं न वेत्सि भगवद्भजनस्य श्रेष्ठतामुपगतो महिमैषः ॥१२५॥
समीपमुपसर्पतां ननु निहन्ति शीतव्यथां
न हन्त्यनुपसर्पतां दहनरीतिरेषा यतः ।
ततः किमु सदोषता भवति वीतिहोत्रार्पिता
स वस्तुमहिमेत्यतो भवतु ते मनो निर्मलम् ॥१२६॥

१२४ वाधुरी, निःसंशयं ।

रागद्वेषौ कथंकारं निर्दोषे जगदीश्वरे ।
वक्तुं समुचितौ तेन फलवैषम्यतां शृणु ॥१२७॥

कर्मानुरूपफलदातरि तावदीशे दोषः कथं भवतु लब्धपदो महेशे ।
कर्मैव तत्फलदमस्त्विति शङ्क्यते चेदेतज्जडं फलदतां कथमभ्युपेयात् ॥१२८॥

निर्धर्मके परे धाम्नि कथं स्यात्फलदातृता ।
फलदो वा भवेत्कोऽन्य इति मे संशयं नुद ॥१२९॥

ब्रह्मणः प्रतिबिम्बं तु मायायामीश उच्यते ।
तल्लक्ष्म मे नाथ वद शृणु द्विविधमस्ति तत् ॥१३०॥

तटस्थलक्षणं त्वेकं जगज्जन्मादिहेतुता ।
स्वरूपलक्षणं चान्यत्सच्चिदानन्दरूपता ॥१३१॥

निर्गुणे ब्रह्मणि कथं सच्चिदानन्दरूपता ।
श्रुत्वेति सस्मितं प्राह सत्यमुक्तं त्वयाऽनघ ॥१३२॥

सत्पदादसतो भिन्नं चित्पदादचितो भिदा ।
अनानन्दाद्भिन्नमाह परमानन्द इत्यपि ॥१३३॥

तत्त्वमस्यादिवाक्येभ्यो यदा जीवपरेशयोः ।
अभेदो भासते तत्तु ज्ञानं मुक्तेस्तु कारणम् ॥१३४॥

असम्भाव्यमिदं नाथ भिन्नयोरीशजीवयोः ।
कथमैक्यं भवेदेतं संशयं मे पराणुद ॥१३५॥

बालः किलायं परिलालितः पुरा स एव तारुण्यदशां प्रपन्नः ।
शरीरसंस्थानविपर्ययेऽपि कथं स एवायमिति प्रतीतिः ॥१३६॥

भिदामवस्थारचितां विहाय पुंसः स्वरूपं तदिहैकमेव ।
विहायजीवेश्वरयोरुपाधी माया मनश्चेति चितस्तदैक्यम् ॥१३७॥

इदमेवौपनिषदं तन्त्रमभ्यसतो मतम् ।
तत्त्वमस्यादिवाक्यानामखण्डार्थप्रकाशिता ॥१३८॥

ज्ञानेनानेन तु भवेद्विनाशः सर्वकर्मणाम् ।
संचितं भस्मतामेति क्रियमाणस्य नोदयः ॥१३९॥

देहप्रारम्भकं यत्तत्प्रारब्धं कर्म नोदितम् ।
देहपातान्तमेतस्यावस्थितिर्दग्धरज्जुवत् ॥१४०॥

एवंविधं पुमांसं जीवन्मुक्तं वदन्त्यत्र ।
निष्कामताऽस्य सहजा ब्रह्मानन्दे निमग्नस्य ॥१४१॥
प्रारब्धमात्रशेषः सुखदुःखाद्यं च तत्कृतं भुञ्जन् ।
न जहाति देहभावं दग्धपटीतुल्यतामेत्य ॥१४२॥
वह्निस्वरूपतामेत्य निजग्रन्थिं जहाति नो ।
यद्वद्दारु तथैवायं न जहात्येव देहिताम् ॥१४३॥
जीवन्मुक्तकथा सेयं यस्य देहावसानके ।
काले ज्ञानोदयस्तस्य सद्यो मुक्तिरिति प्रथा ॥१४४॥
एवं समाकर्ण्य गुरोर्मुखाब्जादुदीर्णवर्णावलिमादरेण ।
गुरोः स पादाम्बुरुहं प्रणम्य समाददे वाक्यमिदं स शिष्यः ॥१४५॥
त्वदीयकृपया नाथ काऽपीदानीं दशा मम ।
निवेदयिष्ये तां रीतिं मयि सानुग्रहः शृणु ॥१४६॥
इयदवधि मदीया दुःखमेवेति बुद्धिः
कलयति भवजालं त्वत्कृपातस्त्विदानीम् ।
विलसति हृदये मे दुःखजातं सुखं वा
न किमपि च ततो मे रीतिरन्यादृशीयम् ॥१४७॥
यथा कश्चित्पान्थः सुतजनिभवानन्दसुभगं
जनं कंचित्पश्यन् भवति न सुखाविष्टहृदयः ।
तथाऽन्यस्मिन्देशे कमपि सुतशोकार्त्तमनसं
निरीक्ष्यापि क्रामन् भवति न हि शोकातुरमनाः ॥१४८॥
ममेदानीं स्ववपुषि ममेदमिति नो मतिः ।
तत्सम्बन्धिनि वाऽन्यस्मिन् कथं स्यान्ममता मम ॥१४९॥
मनश्चञ्चलतां हातुं पुरोपायानचिन्तयम् ।
पोतस्थितशुकावस्थमिदानीं मे मनः स्थिरम् ॥१५०॥
विषयान्तरसंचारचणं तच्चञ्चलं मनः ।
अलब्धविषयं तत्तु कथंकारं गमिष्यति ॥१५१॥
मय्येवलीनं तु मनो मदीयं
केनापि मुष्टा बत शेमुषी मे ।
चित्तं तु वैचित्र्यमिह प्रपन्नं
चेत्त्यं च तेनैव सहावसन्तम् ॥१५२॥

१४१ निःकामता १५२ शेमुखी

मयाऽपमानिताऽहंता हन्तापसृतिशालिनी ।
कथंकारमहंकारपदवी मे दवीयसी ॥१५३॥
विद्याभिमानः प्रागासीत्तपसश्च तथा मम ।
देहाभिमानश्च तथा न जाने क्व गता इमे ॥१५४॥
मिथ्याभिमानो मिथ्यात्वे ज्ञातेऽसौ मत्प्रतारकः ।
अनेन बुद्धोऽहमिति त्रपातः किमपासरत् ॥१५५॥
पुरा बभूव याऽहन्ता हन्त सन्तापकारिणी ।
सैवेदानीं पराऽहन्ता परानन्दफलाय मे ॥१५६॥
यावद्गुणत्रयाबद्धस्तावद्भ्रान्तोऽस्मि सर्वतः ।
गलिते बन्धने चित्रं जाता मे स्थिरता परा ॥१५७॥
पुराऽऽधिभिः किल ग्रस्तः सुसमाधिगवेषणः ।
इदानीं त्वत्कृपातस्तु समाधिर्मद्गवेषणः ॥१५८॥
मत्तो मुक्तिं गता मुक्तिर्बन्धस्यैव तु का कथा ।
महाकल्पाम्बुनेवेदमापूर्णं विश्वमात्मना ॥१५९॥
एतत्परं विस्मयमातनोति ज्ञानाग्निना विश्वमिदं क्षणेन ।
भस्मावशेषं रचितं ततोऽहं जातः परानन्दमयोऽहमस्मि ॥१६०॥
वक्तव्यमिति हि प्रोक्तं विवक्षाऽपि गता मम ।
वक्तव्यं के प्रतिब्रूयां चित्रं त्वंताऽपि मे गता ॥१६१॥
त्वंताऽहंता तथेदंता वाच्यं वागपि वाच्यता ।
सर्वं विलीनमिति मे विस्मयाय परं त्विदम् ॥१६२॥
यावदल्पप्रकाशोऽहं तावत्सर्वमभान्मम ।
महाप्रकाशस्येदानीं भासते नैव किंचन ॥१६३॥
परमानन्दसन्दोहफलं प्राप्तं मया गुरो ।
त्वत्प्रसादात्ततः पूजां कर्तुमिच्छति ते पराम् ॥१६४॥
जल्पो जपः शिल्पमपीह मुद्रा विधिस्तथा भोजनमस्तु होमः ।
प्रदक्षिणप्रक्रमणं गतिर्मे नतिस्तु शय्येत्युपचारक्लृप्तिः ॥१६५॥
जीवन्मुक्तस्य वपुषः सम्बन्धान्न स्वतः क्रिया ।
तत एव मया प्रोक्तमिदं युक्तं प्रतीयताम् ॥१६६॥
गुरुः प्रीतस्ततः प्राह धन्योऽस्युक्ता दशा त्वया ।
जीवन्मुक्तिस्त्वया लब्धेत्यानन्दः परमो मम ॥१६७॥

संवादमावयोरेवं जानन्त्वानन्दसागरम् ।
ये धारयिष्यन्ति नरा जीवन्मुक्ता भवन्ति ते ॥१६८॥
वेदान्ततन्त्रसारादानन्दविलासनामायम् ।
जशवन्तसिंहनाम्ना ग्रन्थः कृतो भूपवर्येण ॥१६९॥

इति श्रीमहिमशालिसकलभूपालमौलिमालालालितचरणपङ्कज-सोमयाजिसार्वभौमदिल्लीश्वरदत्तविद्यारायपदवीविराजमान महाराष्ट्र-वंशोत्तमदेववंशोद्भवदेवेन्द्रदेवात्मजदेवश्रीकमलाकरदेवकृतो ऽयमानन्द-विलासनामा वेदान्तग्रन्थः समाप्तः ॥

संवत् १७२९ वर्षे शाके १५९४ प्रवर्तमाने चैत्रशुदिकपूर्णमास्यां जोशी श्रीवाहालजीसुतसुखानन्दकेन लिखितोऽयं ग्रन्थः ॥

INDEX

(१) अग्नौ प्रास्ताऽऽहुतिः ११८
(२) अतस्त्वनिर्वाच्यपदे १००
(३) अदत्तस्यानुपादान ६४
(४) अद्भ्यो भूः सूक्ष्मरूपाणा १०३
(५) अधिष्ठानं शुक्तिर् ८७
(६) अधिष्ठानं भ्रमस्यास्य १०४
(७) अधिष्ठानाज्ञानं ९६
(८) अन्तर्निरोधनं ७४
(९) अपथ्यं मिष्टमश्नाति ५३
(१०) अपरिग्रहसंज्ञस्तु ६५
(११) अविद्यानाशकं १०६
(१२) अविद्यापरिणामं त्वं ५४
(१३) असम्भाव्यमिदं नाथ १३५
(१४) अस्ति भाति प्रियं नाम ९५
(१५) अहंकृतिर्ममेत्यादि १११
(१६) अहिंसनमहिंसोक्ता ६३
(१७) आत्मा तु व्यापको रूपम् ८९
(१८) आन्तराणि करणानि ४३
(१९) आविर्भूते पिशाचे १८
(२०) आशंसन्ते देहभाजः २१
(२१) इति चिन्तयतो १३
(२२) इत्याकर्ण्य वचः ८०
(२३) इत्याकर्ण्य वचस् ५१
(२४) इदमेत्रौपनिषदं १३८
(२५) इन्द्रियाणां जयः शौचं ६६
(२६) इयदवधि मदीया १४७
(२७) ईश्वरप्रणिधानं तु ६७
(२८) ऊचे गुरुं ८६
(२९) एकदा सुरनदी ५
(३०) एकैकमप्यनर्थाय ४२
(३१) एतत्परं विस्मयमातनोति १६०
(३२) एतैरेव मदीयो ३६
(३३) एतैर्विशुद्धचित्तस्य ७७
(३४) एवंविधं पुमांसं १४१
(३५) एवं समाकर्ण्य गुरोर् १४५
(३६) एवं किलैष १२

(३७) ऐन्द्रजालिकवरो १५

(३८) कर्म त्रिधा क्रियमाणं १२२

(३९) कर्माधीनोत्पत्तिकः ११६

(४०) कर्मानुरूपफलदातरि १२८

(४१) कलानिधेः सङ्गवशात् १०१

(४२) कामक्रोधौ लोभमोहौ १४

(४३) कार्यार्थ मे भवति १०

(४४) किं वा क्रोधस्य २०

(४५) कीदृशं तत्तु विज्ञानं १०५

(४६) गुडस्तिक्तस्तथा शङ्खः ९४

(४७) गुरुः प्रीतस्ततः प्राह १६७

(४८) गुरुः प्रोवाच तं १०७

(४९) घातयति क्रोधवशो २१

(५०) चिदचिद्ग्रन्थिरूपोऽय ११२

(५१) चैतन्यप्रतिबिम्बस्य ११३

(५२) जल्पो जपः शिल्प १६५

(५३) जालन्धरं तथोड्याणं ७१

(५४) जिज्ञासा प्रथमं ५८

(५५) जीर्यन्ते जीर्यतः २६

(५६) जीवन्मुक्तकथा सेयं १४४

(५७) जीवन्मुक्तस्य वपुषः १६६

(५८) ज्ञानस्वरूपं श्रुत्वेति ८२

(५९) ज्ञानेनानेन तु भवेद् १३९

(६०) ज्ञानेन्द्रियेषु ३९

(६१) तं कृपाकुलमना ७

(६२) तटस्थलक्षणं १३१

(६३) तत्त्वमस्यादिवाक्येभ्यो १३४

(६४) तत्रादौ हठयोगं त्वं ६०

(६५) तं गुरुः प्रणतं प्राह ५६

(६६) तं निरीक्ष्य समुपेत्य ६

(६७) तं प्रणम्य पुरुषः ८

(६८) तृणादपि लघुस्तूलस् २५

(६९) त्वदीयकृपया नाथ १४६

(७०) त्वंताऽहंता तथेदंता १६२

(७१) दाह्याभावे दाहकस्या ८५

(७२) दिदृक्षुणा तीर्थसंघं ४८

(७३) दुःखात्मकोऽयं ५२

(७४) देहप्रारम्भकं यत्तत् १४०

(७५) देहस्त्रिधाऽस्य ११४

(७६) ध्यानं तदेकतानत्वं ७६

(७७) न जातु कामः १९

(७८) नष्टे तथ्येऽप्यधिष्ठाने ९२

(७९) नानावर्णविचित्रं २

(८०) नाहंताविषयं चित्तं १०९

(८१) निखिलकरणजातं ३५

(८२) निखिलं प्रपञ्चजातं ३

(८३) निरालम्बः स्वामि ४९

(८४) निर्गुणे ब्रह्मणि कथं १३२

(८५) निर्धर्मके परे धाम्नि १२९

(८६) नेती घ्राणस्य संशुद्धिर् ६९

(८७) परमानन्दसन्दोह १६४

(८८) पर्वतगुहा १७

(८९) पाराशर्यवचोविलासमसृणैः ४

(९०) पीता मदं विरचयत्यहहा ३२

(९१) पुराऽऽधिभिः किल ग्रस्तः १५८

(९२) पुरा बभूव याऽहन्ता १५६

(९३) पूरकः कुम्भकश्चैव ७३

(९४) प्रणम्य प्राञ्जलिः प्राह ६१

(९५) प्रतारकत्वे सन्देहस् ३८

(९६) प्रत्याहारस्तु मनसो ७५

(९७) प्रारब्धमात्रशेषः १४२

(९८) प्रारम्भकं यद् १२३

(९९) बालः किलायं १३६

(१००) बाह्यमान्तरमपीन्द्रियसंघं ४६

(१०१) ब्रह्मणः प्रतिबिम्बं तु १३०

(१०२) ब्रह्मैव नानाविध ९९

(१०३) भद्र भद्रमधुना १२५

(१०४) भवद्दर्शनतो ५०

(१०५) भवद्वचनमाधुरी १२४

(१०६) भस्त्रा प्राणस्य संशुद्धौ ७०

(१०७) भिदामवस्थारचितां १३७
(१०८) भ्रमचेत्सदधिष्ठानो ९१
(१०९) मत्तः पुमान् न जानाति ३१
(११०) मत्तो मुक्ति गता मुक्तिर् १५९
(१११) मत्सरस्य पिशाचस्य ३३
(११२) मदीयं चक्षुरित्याद्यैः १०८
(११३) मदीयत्वेन यद्भाति ११०
(११४) मनः पाटच्चरस्यार्थं ४५
(११५) मनश्चञ्चलतां हातुं १५०
(११६) मम सन्देहसन्दोह ९०
(११७) ममेदानीं स्ववपुषि १४९
(११८) मयाऽपमानिताऽहंता १५३
(११९) मय्येव लीनं १५२
(१२०) महामुद्रां च जानीहि ७२
(१२१) माङ्गल्यकुम्भमिव १
(१२२) मायासङ्गादीश्वरत्वं १०२
(१२३) मार्जारभक्षिते ११
(१२४) मिथ्या भवोऽयमिति ९
(१२५) मिथ्याभिमानो मिथ्यात्वे १५५
(१२६) मुख्यं तु कारणं कर्म १२१
(१२७) मोहस्य रागसंज्ञस्य २९
(१२८) मोहेन मुग्धमनसो २८
(१२९) यत्पृथिव्यां २४
(१३०) यत्संकल्पविकल्प ४४
(१३१) यथा कश्चित्पान्थः १४८
(१३२) यमोऽथ नियमश्चान्य ६२
(१३३) यावदल्पप्रकाशोऽहं १६३
(१३४) यावद्गुणत्रयाबद्धस् १५७
(१३५) रसविषया सा ४१
(१३६) रागद्वेषौ कथंकारं १२७
(१३७) रूपप्रदर्शन १६
(१३८) लुब्धस्तु कोटिधनवानपि २३
(१३९) लोभस्य संप्रति २२
(१४०) वक्तव्यमिति हि प्रोक्तं १६१
(१४१) वह्निस्वरूपतामेत्य १४३
(१४२) विद्याभिमानः प्रागासीत् १५४
(१४३) विवेकविधुरस्यास्य ३०
(१४४) विशेषांशं छादयति ९८
(१४५) विषयान्तरसंचार ७९
(१४६) विषयान्तरसंचार १५१
(१४७) वेदान्ततन्त्रसारा १६९
(१४८) व्यवहारदशायां तु ८३
(१४९) शंकरो गुरुरनन्यमनस्कं ८१
(१५०) शिष्यः प्रणम्य प्रोवाच ५५
(१५१) शुक्तिं प्रदर्शयति ५७
(१५२) शुक्रं गर्भाशयं प्राप्य १२०
(१५३) श्रवणेन्द्रियेण ४०
(१५४) श्रुतितात्पर्यविधृतिः ७८
(१५५) षड्भिरेतैरहं बद्धः ३४
(१५६) संलग्नतैत्र किल ११५
(१५७) संवादमावयोरेवं १६८
(१५८) संकल्पतो याऽऽहुति ११७
(१५९) संकल्पतो याऽऽहुति ११९
(१६०) सत्पदादसतो भिन्नं १३३
(१६१) सत्यत्वे श्रवणादीनां ८४
(१६२) सद्गुरूपसरणं ५९
(१६३) समीपमुपसर्पतां १२६
(१६४) सस्मितः प्राह स गुरुर् ८८
(१६५) सादृश्यमन्तरा केन ९३
(१६६) साधनकथां विचित्रा ५७
(१६७) साधु यदुक्तं भवता ९७
(१६८) सुखाभासं दुःखरूप ४७
(१६९) स्थिरं सुखमिति प्रोक्तं ६८

APPENDIX

A Table of Metres

Metre	Verses	Total
Vasantatilaka	1, 9, 10, 12, 16, 22, 23, 28, 32, 37, 86, 114, 115, 128	14
Gîti	2	1
Āryā	3, 17, 21, 40, 57, 142	6
Indravajrā	5, 6, 7, 8, 15, 27, 43, 46, 59, 81, 125, 152, 160	13
Anuṣṭup	11, 19, 20, 24 to 26, 29 to 31, 33, 34, 38, 42, 45, 47, 48, 50, 53 to 56, 60 to 79, 82 to 85, 88 to 95, 98, 103 to 113, 118, 120 to 122, 127, 129 to 135, 138 to 140, 143, 144, 146, 149 to 151, 153 to 159, 161 to 164, 166 to 168	100
Upendravajrā	13	1
Śālinî	14, 102, 116	3
Sragdharā	18	1
Mālinî	35, 147	2
Upagîti	36, 41, 97, 141, 169	5
Mukhacapalā	39	1
Śikhariṇî	49, 87, 96, 148	4
Upajāti	52, 99 to 101, 117, 119, 123, 136, 137, 145, 165	11
Pṛthvî	124, 126	2

ERRATA

Verse	Incorrect	Correct
२१	– मात्मन –	मात्मान
१४०	प्रारब्धे	प्रारब्धं
१५२	मय्येवलीनं	मय्येव लीनं
१५२	चेत्यं	चैत्यं
१५२	०वसन्तम्	वसन्नम्
१६१	के	कं
१६४	०च्छति	च्छामि